अर्धनारीश्वर स्तोत्रं

अर्धनारीश्वर स्तोत्रं

चांपेयगौरार्धशरीरकायै
कर्पूरगौरार्धशरीरकाय |
धम्मिल्लकायै च जटाधराय
नमः शिवायै च नमः शिवाय || 1 ||

कस्तूरिकाकुंकुमचर्चितायै
चितारजःपुंजविचर्चिताय |
कृतस्मरायै विकृतस्मराय
नमः शिवायै च नमः शिवाय || 2 ||

झणत्क्वणत्कंकणनूपुरायै
पादाब्जराजत्फणिनूपुराय |
हेमांगदायै भुजगांगदाय
नमः शिवायै च नमः शिवाय || 3 ||

विशालनीलोत्पललोचनायै
विकासिपंकेरुहलोचनाय |
समेक्षणायै विषमेक्षणाय
नमः शिवायै च नमः शिवाय || 4 ||

मंदारमालाकलितालकायै
कपालमालांकितकंधराय |
दिव्यांबरायै च दिगंबराय
नमः शिवायै च नमः शिवाय || 5 ||

अंभोधरश्यामलकुंतलायै
तटित्प्रभाताम्रजटाधराय |
निरीश्वरायै निखिलेश्वराय
नमः शिवायै च नमः शिवाय || 6 ||

प्रपंचसृष्ट्युन्मुखलास्यकायै
समस्तसंहारकतांडवाय |
जगज्जनन्यै जगदेकपित्रे
नमः शिवायै च नमः शिवाय || 7 ||

प्रदीप्तरत्नोज्ज्वलकुंडलायै
स्फुरन्महापन्नगभूषणाय |
शिवान्वितायै च शिवान्विताय
नमः शिवायै च नमः शिवाय || 8 ||

एतत्पठेदष्टकमिष्टदं यो
भक्त्या स मान्यो भुवि दीर्घजीवी |
प्राप्नोति सौभाग्यमनंतकालं
भूयात्सदा तस्य समस्तसिद्धिः || 9 ||

इति श्रीमच्छंकराचार्य कृत अर्धनारीश्वर स्तोत्रं |